CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

PART 14

By

Dr. Pandit. S. D. SATWALEKAR

Sri Vidya Bharathi
Book Centre,
Bharathi Street,
SRINGERI - 577 139.

भारती [जि. धारवाड]

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Verbs of the 10 th Conjugation

In the previous book, we gave the roots of the 1st conjugation. Among all the verbal roots, those of the 1st conjugation and the 10th conjugation are more in number and very useful. Therefore after giving the roots of the 1st conjugation in the former book, we are giving the roots of the 10th conjugation in this book.

If the students study the roots of these two conjugation well, they will have the knowlege of all the verbs necessary for them. We hope therefore that the students after practising so much, they will enter the temple of Sanskrit literature.

The number of the verbal roots that are found in these two conjugations (1st and the 10th) together, are almost equal to the number of the other eight conjugations put together. Therefore, by the study of the roots of these two conjugations, the students will have with them the collection of half of the verbal roots of the Sanskrit literature. If the students will make use of them in a proper way, they will be greatly benefited.

Author

Shripad Damodar Satwalekar

Second Edition 1990

*

Printed & Published by V. S. Satwalekar,
Swadhyaya Mandal, Bharat-Mudranalaya,
PARDI, Dist. Valsad, Gujarat, India

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

PART 14.

Lesson– 1.

Roots of the tenth conjugation

The forms of the 10th conjugation. roots are as easily formed as those of the 1st conjugation. Where in the case of the roots of the 1st conjugation. 'अ' is added between the root and the suffix, there, in the case of those of the 10th conjugation, 'अय' is added. This is all the important difference. The rest of the forms are almost alike. See for example—

Root 'पत्' is both of the 1st and the 10th conjugation, and so we show its forms in both—

'पत्' = (to fall)

प्रथम गण	दशम गण
१ पतति	पतयति ।
२ पतिता	पतयिता ।
३ पतिष्यति	पतयिष्यति ।

×

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

There is no special difference in the forms where in the case of the 1st canjugation, 'अ' is not added. But only in the case of लिट् (Past perfect), there is some difference. Now see—

प्रथम गण	दशम गण
१ पपात	पतयाञ्चकार

Now for the easy understanding of the students we give the forms of the 10th conjugation.

'पत्' = (to fall)

१ लट् = (वर्तमानकाल) परस्मैपद—

१ पतयति, पतयतः, पतयन्ति। २ पतयसि, पतयथः, पतयथ।
३ पतयामि, पतयावः; पतयामः।

आत्मनेपद—

१ पतयते, पतयेते, पतयन्ते। २ पतयसे, पतयेथे, पतयध्वे।
३ पतये, पतयावहे, पतयामहे।

There are some more froms of this root as follow—

परस्मैपद—

१ पातयति, पातयतः, पातयन्ति।

आत्मनेपद—

१ पातयते, पातयेते, पातयन्ते।

Other forms should be made in this way by supposing and putting 'पा' in the place of 'प्' See the forms of other roots—

'चुर्' = (to steal)

१ लट् = (Present) परस्मैपद—

१ चोरयति, चोरयतः, चोरयन्ति। २ चोरयसि, चोरयथः, चोरयथ।
३ चोरयामि, चोरयावः, चोरयामः।

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

आत्मनेपद—

१ चोरयते, चोरयेते, चोरयन्ते । २ चोरयसे, चोरयेथे, चोरयध्वे । ३ चोरये, चोरयावहे, चोरयामहे ।

'तड्' = (To beat)

२ लङ् = (Past imperfect) परस्मैपद—

१ अताडयत्, अताडयताम्, अताडयन् । २ अताडयः, अताडयतम्, अताडयत । ३ अताडयम्, अताडयाव, अताडयाम ।

आत्मनेपद—

१ अताडयत, अताडयेताम् अताडयन्त । २ अताडयथाः, अताडयेथाम्, अताडयध्वम् ३ अताडये, अताडयावहि, अताडयामहि ।

'भू' = (to consider)

३ लोट् = (आज्ञार्थ— Imperative) परस्मैपद—

१ भावयतु, भावयताम्, भावयन्तु । २ भावय, भावयतम्, भावयत । ३ भावयानि, भावयाव, भावयाम ।

आत्मनेपद—

१ भावयताम्, भावयेताम्, भावयन्ताम् । २ भावयस्व, भावयेथाम्, भावयध्वम् । ३ भावयै, भावयावहै, भावयामहै ।

The forms are framed as above. In this tenth conjugation, there are probably no roots in परस्मैपद and there is a small number of आत्मनेपद roots and the rest are of both परस्मै and आत्मनेपद. The forms of theseउभयपद roots have their forms framed a like परस्मैपद as well as आत्मनेपद forms, as is shown above.

लिट् (Past perfect tense)— The forms are very easily formed as shown below—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'चुर्' = (to steal)

परस्मैपद	आत्मनेपद
चोरयामास	चोरयामास
चोरयाम्बभूव	चोरयाम्बभूव
चोरयाञ्चकार	चोरयाञ्चक्रे

That is, by adding आस, बभूव, चकार the forms of this tense are formed. As the forms of every root can be framed in this manner, it is easy to frame them.

Forms of परस्मैपद्

१ चकार, चक्रतुः चक्रुः । २ चकर्थ, चक्रथुः, चक्र । ३ चकार (चकर), चकृव, चकृम ।

Forms of आत्मनेपद्

१ चक्रे, चक्राते, चक्रिरे । २ चकृषे, चक्राथे, चकृढ्वे । ३ चक्रे, चकृवहे, चकृमहे ।

By adding the above to any root the forms of लिट् tense these can be framed.

१ चोरयांचकार, चोरयांचक्रतुः, चोरयांचक्रुः । इत्यादि ।

This is the rule with all the roots. We give some more roots.

Roots of 10th conjugation

(उभयपद)

अघ् = (to sin) = अघयति, अघयते । अघयाञ्चकार-चक्रे । अघयिता । अघयिष्यति, अघयिष्यते ।

अंक् = (to mark) = अंकयति, अंकयते, अंकयाञ्चकार-चक्रे । अंकयिता । अंकयिष्यति, अंकयिष्यते ।

अंग् = (to mark) = अंगयति, अंगयते । इत्यादि० ।

अंध् = (to become blind) = अंधयति, अंधयते । अंधयाञ्चकार-चक्रे । अंधयिता । अंधयिष्यति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आमय् = (to be sick) = आमयति–ते । आमयाञ्चकार–चक्रे । आमयिता । आमयिष्यति ।

अर्क् = (to praise) = अर्कयति–ते । अर्कयांचकार–चक्रे । अर्कयिता ।

अर्घ् = (to worship) = अर्घयति–ते । अर्घयांचकार–चक्रे । अर्घयिता । अर्घयिष्यति–ते ।

अर्च् = (to worship) = अर्चयति–ते । अर्चयांचकार–चक्रे । (पूर्ववत्)

अर्ह् = (to worship) = अर्हयति–ते । अर्हयांचकार–चक्रे । अर्हयिता । अर्हयिष्यति–ते ।

अवघीर् = (to defame) = अवघीरयति–ते । अवघीरयांचकार–चक्रे । अवघीरयिता । अवघीरयिष्यति–ते ।

अंश् = (to divide) = अंशयति–ते । अंशयांचकार–चक्रे । अंशयिता । अंशयिष्यति–ते ।

In the above, firstly the root, then its meaning, then लट् (Present tense) form, then लिट् (Past perfect), then लुट् (1st future), then लृट् (Simple future) forms are given. From these the students can frame the other forms.

संस्कृत–वाचन–पाठः

१. स वस्त्रं अंकयति । स किं अंकयांचक्रे ? अहं न किमपि अंकयांचक्रे । त्वं कदा तत् अंकयिष्यसि ?

२ किमर्थं स अघयति । यदा स अघयांचकार तदा त्वया किं कृतम् ? वयं न अघयांचक्रम ।

३ ते सर्वे सूर्यं अर्कयांचक्रुः । ईश्वरं सर्वेऽपि अर्कयिष्यन्ति । कः तत्र अर्कयिष्यति ? कयं स अर्कयिष्यति ? कः एवं अर्कयते ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

४ त्वं देवं अर्चय । अहमपि परमात्मानं मनसा एव अर्चयामि । यदा स तं अर्चयांचकार तदा त्वया किं कृतम् ?

५ सदा दुष्टः मनुष्यः सत्पुरुषं अवधीरयति ।

In this way, the students can construct sentensces, and increase their pratice. By trying with a little consideration, the students will gain the ability of constructing great many sentences.

Lesson– 2

Word - meaning

विपाकः	– Result
उपस्थितः	– Came
सांप्रतं	– Now
नृशंस	– Wicked man
सकाम	– With fulfilled wishes
द्रोणी	– Vessel
बीजं	– Seed
प्रकीर्यन्ते	– are sown
त्वरमाणः	– One who hastens
एकैकशः	– One by one
अनुजाने	– I order
शुनः	– A dog
श्वा	– A dog
उपायनं	– a present
सप्तरात्री	– Seven nights
तुमुल	– Big
आलयं	– House or Temple
उपाघ्राय	– having smelt
विलपन्	– Crying
प्रष्टुं	– for asking
परदारा	– other man's wife
पश्चिमं संदेशं	– Last prayer
विवासनं	– to send away from the city

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अयशः – Defame
विवर्तयिष्यामि – I shall bring back
अनुत्तमं – The best
मोक्षयित्वा – freeing from bondage
छिन्धि – having broken
स्नुषा – daughter-in-law
स्तैन्यं – Stealing
सैन्धवः – belonging to Sindh
दारहरणं – stealing other's wife
वनौकाः – Housing in forest
विप्रवासः – sending away from a city
अक्लिष्ट – Easy, without difficulty

Roots of Verbs

उप-स्था – To be present
सं-त्यज् – To throw away
अप-नी – To take far away
आ-नी – To bring
आ-ख्या – To say
वि-लप् – To cry
अत्यगात् – went
आख्याहि – say
आसांचक्रे – sat
उपचक्रमे – began
आ-घ्रा – to smell
उप-क्रम् – to begin
नि-वृत् – to return
मुच् – to free from bondage

संस्कृत-वाचन-पाठः

हे कौसल्ये ! तस्यैव मम कर्मणोऽयं विपाक उपस्थितः। तस्य मुनेः शापकारणादद्यैव मे मरणं आगतमिति मन्ये। अद्याहं पुत्रशोकेन जीवितं संत्यक्ष्यामि। सांप्रतमेवाहं चक्षुर्भ्यां न पश्यामि त्वामपि। अतः, हे कौसल्ये ! त्वं हस्तेन मां स्पृश। मया रामे योग्यं आचरणं न कृतम्। यत्तु रामेण कृतं तत्तु शोभनमेव। अतस्तस्य रामस्य शोको मम प्राणाञ्छोषयति। क्षीणतैलो दीप इव मम हृदयं शाम्यति। हा राम ! हा राम !

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुत कुत्र गतोऽसि। अत्र त्वां न पश्यामि। हा कौसल्ये! हा सुमित्रे! इति विलपन् राजा दशरथः प्राणान् जहौ।

दशरथे नृपे एवं शान्ते कौसल्या मूर्च्छिता भूत्वा भुवि निपतिता। तां तथा पतितां दृष्ट्वा सर्वं नरेन्द्रस्य भवनं रोदनमयं बभूव। गतप्रभं राज्ञः दशरथस्य मुखमवलोक्य कौसल्या कैकेयीमब्रवीत्- नृशंसे! कैकेयी! सकामा भव। अकंटकं राज्यं भुंक्ष्व। अहं तु अत ऊर्ध्वं जीवितुमपि नोत्सहे। का खलु भर्तारं परित्यज्य जीवितुमिच्छेत्? कैकेय्या अद्य राघवाणां कुलं हतम्। न रामो जानाति मां अद्यैव विधवां जाताम्। साहं गमिष्यामि पतिलोकमद्यैव। प्रवेक्ष्यामि वा अग्निम्।'

नृपतेः शरीरमेवालिंगयन्तीं कौसल्यां सेवकास्ततः स्थानात् दूरं अपनिन्युः। राज्ञः शरीरं तैलद्रोण्यां संवेश्य ते तस्य सर्वाणि कर्माणि चक्रुः। व्यतीतायां तु रजन्यां द्विजातयो राजसभां ईयुस्तत्र श्रेष्ठं राजपुरोहितं वसिष्ठं ऊचुः।

ऋषय ऊचुः— 'अद्यैव कश्चित् राजा इक्ष्वाकूणां विधीयताम्। अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात्। अराजके जनपदे पर्जन्योऽपि न वर्षति। न च केनापि बीजानि प्रकीर्यन्ते। पुत्रः पितुर्वशेन वर्तते, नापि भार्या स्वामिनः वशे भवति। अराजके जनपदे मत्स्या इव जनाः परस्परं भक्षयन्ति। नरेन्द्रो हि राष्ट्रस्य धर्मरक्षकः। अतः अद्यैव कश्चिद्राजा विधीयताम्।'

वसिष्ठ उवाच- 'अहो! वयं किं समीक्षामहे? शोकं त्यक्त्वा मम शासनाद्भरतः शीघ्रं दूतसहाय्येनानीयताम्। हे दूत! त्वं भरतं प्रति त्वरमाणो याहि कथय च तं पुरोहितः त्वां कुशलं प्राह। आगच्छ च शीघ्रमिति। तस्मै च पितरं मृतं, रामं च वने गतं, मा कथय।'

तथा आज्ञप्ता दूता ययुः। यथाऽऽविष्टं च भरतमूचुः। वस्त्राण्याभरणानि भरताय तस्य मातुलाय च ददुः। भरतोऽपि

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

तत्सर्वं स्वीकृत्य सर्वेषां कुशलमेकैकशः पप्रच्छ। दूतैः प्रेरितो भरतो मातामहमुवाच 'राजन्! गच्छामि पितुः सकाशमिति।' तं शिरसि आघ्राय मातामह उवाच– 'गच्छ तात! अनुजाने त्वाम्। सुप्रजा त्वया कैकेयी। मदर्थं सर्वेषां कुशलं ब्रूयाः' इति।

एवं सत्कृत्य राजा कैकेयः भरताय बहु धनं ददौ। अंतेपुरेऽतिसंवृद्धान् महाकायान् शुनश्चोपायनं ददौ। शत्रुघ्नसहितः भरतस्ततो रथमारुह्य ययौ। सप्तरात्रादूर्ध्वं सालवनं प्राप्याऽयोध्यामरुणोदयसमये ददर्श। पुरुषव्याघ्रः अयोध्यां पुरीं दृष्ट्वा सारथिमब्रवीत्– 'नाहं अयोध्यायाः तुमुलं शब्दं शृणोमि। उद्यानानि यथापूर्वाणि प्रफुल्लानि न दृश्यन्ते। सूत! कथय कथमेतत्? मे बंधुषु कुशलं वर्तते वा न?'

एवं दुःखार्तो भरतो अयोध्यां प्रविवेश। पितुरालये पितरमपश्यन्, मातुरालये मातरं द्रष्टुं जगाम। तं समुपाघ्राय कैकेयी कुशलं पप्रच्छ। भरतः सर्वं कथयामास। मातरं पप्रच्छ च 'किमिति राजानं न पश्यामि' इति। कैकेयी कथयामास– 'या सर्वेषां भूतानां गतिस्तां गतिं ते पिता गतः' इति। श्रुत्वैव तद्भरतो भूमौ निपपात। उवाच च ताम् 'केन व्याधिना राजाऽत्यगात्? रामोऽपि कुत्र गतः तच्छीघ्रमाख्याहि। पितैव हि ज्येष्ठो भ्राता। धर्मं जानतः आर्यस्य। तथा पितुः पश्चिमं संदेशं श्रोतुमिच्छामि।'

एवं पृष्टा कैकेयी यथाभूतमकथयत्। यथा 'हा राम, हा सीते, हा लक्ष्मणेति, विलपन् राजा परलोकं गतः। लक्ष्मणानुचरो रामोऽपि सीतया सह वनं गतः।' श्रुत्वैतत् भरतः पुनः प्रष्टुमुपचक्रमे। कच्चिद्रामेण ब्राह्मणधनं न हृतम्? कच्चिन्न विहिंसितोऽपापः? न वा कच्चित्परदारानभिमन्यते येन विवासितः?' इति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कैकेयी तमुवाच– 'अभिषेचनमिह रामस्य श्रुत्वा तव पिता मया याचितः, राज्यं त्वदर्थं भवतु, रामस्य च वने विवासनं भवस्थिति ।'

श्रुत्वैतत्संत्रस्तो भरतस्तां तदोवाच । 'राजानं मृत्युवशं रामं च तापसं कृत्वा त्वया मे दुःखमेव संवर्धितम् । त्वं कुलस्य कालरात्रिरेव प्रत्यक्षं संजाता । कथं तव ईदृशी पापमयी बुद्धिः समुत्पन्ना ? अस्मिन् जीवलोके त्वयाऽहं अयशः प्रापितः । एष इदानीं गमिष्यामि रामं प्रति निवर्तयिष्यामि च तं भ्रातरं वनात् ।' भ्रातरं इत्युक्त्वा कैकेयीभवनात्कौसल्यागारं सशत्रुघ्नो भरतः प्रातः ।

Lesson– 3

For the benifit of the students we give the forms of some more roots of the 10th conjugation—

लिट् (Past perfect)

'ईड्' = (to praise) परस्मैपद—

१ ईडयांचकार, ईडयांचक्रतुः, ईडयांचक्रुः । २ ईडयांचकर्थ, ईडयांचक्रथुः, ईडयांचक्र । ३ ईडयांचकार (चकर): ईडयांचक्रुव ईडयांचक्रुम ।

आत्मनेपद—

१ ईडयांचक्रे, ईडयांचक्राते, ईडयांचक्रिरे । २ ईडयांचकृषे, ईडयांचक्राथे, ईडयांचकृढ्वे । ३ ईडयांचक्रे, ईडयांचकृवहे, ईडयांचकृमहे ।

In this way the forms of the roots of the 10 th conjugation are framed. They are framed by adding the following suffixes also.

१ आस, आसतुः, आसुः । २ आसिथ, आसथुः, आस । ३ आस, आसिव, आसिम ।

Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

The forms are—

१ ईड्यामास, ईड्यामासतुः, ईड्यामासुः । २ ईड्यामासिथ ईड्यामासथुः, ईड्यामास । ३ ईड्यामास, ईड्यामासिव, ईड्यामासिम ।

दशम गण—उभयपद धातु

आंदोल् = (to move to and fro) आंदोलयति-ते। आंदोलयांचकार-चक्रे। आंदोलयिता। आंदोलयिष्यति-ते।

आप् = (to get) आपयति-ते। आपयांचकार-चक्रे। आपयिता। आपयिष्यति-ते।

ईड् = (to praise) ईड्यति-ते। ईड्यांचकार-चक्रे। ईड्यिता। ईड्यिष्यति-ते।

ऊन् = (to be less) ऊनयति-ते। ऊनयांचकार-चक्रे। ऊनयिता। ऊनयिष्यति-ते।

ऊर्ज् = (to be strong) ऊर्जयति-ते।

ओलण्ड् = (to cross) ओलण्डयति-ते।

कथ् = (to say) कथयति-ते।

कर्त् = (to cut) कर्तयति-ते।

कल् = (to go, to count) कलयति-ते।

काल् = (to count time) कालयति-ते।

कित् = (to live) केतयति-ते।

कुंठ् = (to surround) कुंठयति-ते।

कुप् = (to say) कोपयति-ते।

कुमार् = (to play) कुमारयति-ते।

कृप् = (to be able) कल्पयति-ते।

कल्प् = (to be able) कल्पयति-ते।

कृत् = (to say) कीर्तयति-ते।

केत् = (to call) केतयति-ते।

आक्रन्द् = (to cry) आक्रन्दयति-ते।

Sri Vidyabhaskara Digital Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

We have given the forms of the present tense of some of these roots. The students can form other forms here and here-after.

केतयति-ते । ईडयांचकार-चक्रे ।

This way we give the concise forms. The meaning—

(परस्मै०) केतयति, (आत्मने०) केतयते ।

(परस्मै०) ईडयांचकार (आत्मने०) ईडयांचक्रे ।

The forms are thus framed, the spitit is to be understood. If the students remember the method, probably they will have no difficulty any where.

संस्कृत–वाक्यानि

१ वीरः ऊर्जयति । कः तदा ऊर्जयांचकार ? स किमर्थं ऊर्जयिष्यति ? ते सर्वे नैव ऊर्जयन्ति ।

२ इदानीं बालकः आक्रंदयति । सर्वेऽपि बालकाः एवं आक्रंदयन्ति । कदा ते सर्वे आक्रंदयांचक्रुः ?

३ यदा ते कर्तयिष्यन्ति तदा त्वं किं करिष्यसि । कथं ते कर्तयांचक्रुः ? किमर्थं ते एवं कर्तयांचक्रुः ?

४ त्वं कथय यत् त्वया इदानीं तत्र श्रुतम् । रामचंद्रः स्वकीयां कथां कथयांचकार । स न कथयिष्यति ।

Now see some more roots—

दशम गणके–उभयपद धातु

क्षप् = (To induce) क्षपयति-ते ।

क्षल् = (to wash) क्षालयति-ते ।

खण्ड् = (to cut to pieces) खण्डयति-ते ।

गण् = (to count) गणयति-ते ।

गर्ज् = (to roar) गर्जयति-ते । (प्रथम गण–गर्जति)

गाह् = (to plunge) गाहयति-ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गवेष् = (to research, to investigate) गवेषयति–ते ।
अवगुण्ठ् = (to veil) अवगुण्ठयति–ते ।
गुण् = (to multiply) गुणयति–ते ।
ग्रन्थ् = (to establish connection) ग्रंथयति–ते ।
ग्रस् = (to swallow) ग्रासयति–ते ।
ग्राम् = (to invite) ग्राम्यति–ते ।
घट् = (To collect) घटयति–ते ।
घण्ट् = (to make noise) घण्टयति–ते ।
चण्ड् = (to be angry) चण्डयति–ते ।
चर्व् = (to eat) चर्वयति–ते ।
चल् = (to go) चालयति–ते ।
चित्र् = (to draw pictures) चित्रयति–ते ।
चिन्त् = (to think) चिन्तयति–ते ।
चिन्ह् = (to mark) चिन्हयति–ते ।
चुद् = (to induce) चोदयति–ते ।
चुम्ब् = (to kill, to trouble) चुम्बयति–ते ।

संस्कृत–वाक्यानि

१ अहं वस्त्राणि अत्रैव प्रक्षालयामि । ते सर्वे कदा स्वकीयानि वस्त्राणि । प्रक्षालयांचक्रुः ? यः पुरुषः वस्त्रं प्रक्षालयिष्यति स एव अत्र आगच्छतु ।

२ त्वं किं खण्डयसि ? त्वं तत्काष्ठं केन शस्त्रेण खण्डयसि ? कः तत् अखण्डयत् ? यदि त्वं खण्डयितुं इच्छसि तर्हि काष्ठं खण्डय । वयं तत् नैव खण्डयांचक्रम ।

३ स रूप्यकान् गणयति । अहं रूप्यकान् अगणयम् । विश्वामित्रः सर्वं गणयांचकार ।

४ मेघः आकाशे गर्जयति । कदा मेघाः गर्जयन्ति ? यदा वृष्टिसमयः आगच्छति तदा एव मेघाः आकाशे गर्जयन्ति । सर्वे मेघाः गर्जयांचक्रुः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ चित्रकारः सुंदरं चित्रं चित्रयति। कस्य चित्रं सः चित्रयति ? यदा तच्चित्रं चित्रितं भविष्यति तदा स किं करिष्यति ?

६ मनुष्यः अन्नं चर्वयति। यथा स चर्वयति तथैव त्वं चर्वय। सर्वे अपि चर्वयन्ति।

Let tae students frame the forms of the roots above given and increase their practice.

Lesson– 4

धनंजयश्च तेजस्वी प्रणिपत्य पुरंदरम्।
भृत्यवत्प्रणतस्तस्थौ देवराजसमीपतः ॥ ८ ॥

'तेजस्वी तेजोयुक्तः धनंजयः अर्जुनः च पुरंदरं शत्रुनगरविध्वंसकं इन्द्रं प्रणिपत्य प्रणम्य देवराजसमीपतः इन्द्रस्य समीपं एव भृत्यवत् दासवत् प्रणतः नम्रः सूत्वा तस्थौ स्थितवान्।'

आघ्राय तं महातेजाः कुन्तीपुत्रो युधिष्ठिरः।
धनंजयमभिप्रेक्ष्य विनीतं स्थितमन्तिके ॥ १० ॥
जटिलं देवराजस्य तपोयुक्तमकल्मषम्।
हर्षेण महताऽऽविष्टः फाल्गुनस्याथ दर्शनात् ॥ ११ ॥

'महातेजाः अतितेजाः कुन्तीपुत्रः कुन्तीनंदनः युधिष्ठिरः सं देवराजस्य इंद्रस्य अंतिके समीपभागे एव स्थितं विनीतं नम्रं, जटिलं प्रशस्ताभिः जटाभिः युक्तं, तपोयुक्तं तपसा युक्तं, अकल्मषं पापरहितं तं धनंजयं अर्जुनं अभिप्रेक्ष्य अवलोक्य, तं अर्जुनं आघ्राय च तस्य गन्धं आघ्राय च, अथ फाल्गुनस्य दर्शनात् महता हर्षेण आविष्टः युक्तः अभूत्।'

बभूव परमप्रीतो देवराजं च पूजयन्।
तं तथाऽऽसीनमनसं राजानं हर्षसंप्लुतम् ॥ १२ ॥
उवाच वचनं धीमान्देवराजः पुरंदरः।
त्वमिमां पृथिवीं राजन्प्रशासिष्यसि, पांडव।
स्वस्ति प्राप्नुहि कौन्तेय राज्यं पुरुषसत्तम ॥ १३ ॥

Sri Vidyabharathi Book Centre, Srirgeri

CC-O. In Public Domain. Digitized by eGangotri

' (सः युधिष्ठिरः) देवराजं इन्द्रं च पूजयन् पूजयित्वा परमप्रीतो बभूव । तं राजानं धर्मराजानं हर्षसंप्लुतं हर्षयुक्तं तथा अवीनमनसं दीनमनोभाव-रहितं युधिष्ठिरं धीमान् पुरंदरः शत्रुनगरमेत्ता देवराजः इन्द्रः इदं वचनं अब्रवीत् । हे पांडव ! हे धर्मराज ! हे राजन् ! त्वं इमां पृथिवीं प्रजासिष्यसि राष्ट्रस्य शासनं करिष्यसि । हे कौन्तेय ! कुन्तीनंदन ! धर्मराज ! पुनः काम्यकं आश्रमं त्वरित प्राप्नुहि । '

अस्त्राणि लब्धानि च पांडवेन सर्वाणि मत्तः प्रथितेन राजन् ।
कृतप्रियश्चास्मि धनंजयेन हंतुं न शक्यस्त्रिभिरेष लोकैः ॥ १४ ॥
(महाभारत वन. अ. २६६)

' हे राजन् ! मत्तः मत्सकाशात् पांडवेन पंडुनंदनेन अर्जुनेन अहं सर्वाणि अखिलानि अस्त्राणि प्राप्तानि । धनंजयेन अर्जुनेन अहं कृतप्रियः अस्मि । तेन मम अतीव प्रियं कार्यं कृतं इति अभिप्रायः । अतः एषः अर्जुनः त्रिभिः लोकैः जेतुं न शक्यः । एवं सर्वत्र विजयी एव संजातः । '

Now after studying the previous verses, let them study the following verses—

युधिष्ठिर उवाच—

कस्मिन्रामः कुले जातः किं वीर्यः किं पराक्रमः ।
रावणः कस्य पुत्रो वा किं वैरं तस्य तेन ह ॥ ४ ॥
एतन्मे भगवन्सर्वं सम्यगाख्यातुमर्हसि ।
श्रोतुमिच्छामि चरितं रामस्याक्लिष्टकर्मणः ॥ ५ ॥

मार्कंडेय उवाच—

अयो नामाभवद्राजा महानिक्ष्वाकुवंशजः ।
तस्य पुत्रो बलरथः शम्बरस्वाध्यभवच्छुचिः ॥ ६ ॥
अभवंस्तस्य चत्वारः पुत्रा धर्मार्थकोविदाः ।
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ॥ ७ ॥
रामस्य माता कौसल्या कैकेयी भरतस्य तु ।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायाः परंतपौ ॥ ८ ॥
(महाभारत वन. अ. २७४)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

युधिष्ठिर उवाच— कस्मिन्कुले रामो जातः ? स किं वीर्यः ? किं पराक्रमः ? रावणो वा कस्य पुत्रः ? तस्य रावणस्य तेन रामेण सह किं निमित्तं वैरम् ? ॥ ४ ॥ हे भगवन् ! एतत् सर्वं मे सम्यक् आख्यातुं अर्हसि । अखिलष्टकर्मणो रामस्य चरितं श्रोतुमिच्छामि ॥

मार्कंडेय उवाच— इक्ष्वाकुवंशजः अजो नाम महान् राजा अभवत् । तस्य पुत्रः दशरथः शश्वत् निरन्तरं स्वाध्यायवान् स्वाध्याययुक्तः शुचिः पवित्रः ॥ ६ ॥ तस्य दशरथस्य धर्मार्थकोविदाः चत्वारः पुत्राः अभवन् । राम-लक्ष्मण-शत्रुघ्नाः महाबलः भरतश्च ॥ ७ ॥ रामस्य माता कौसल्या, भरतस्य तु माता कैकेयी, सुमित्रायाः सुतौ परन्तपौ शत्रुतापकौ लक्ष्मण-शत्रुघ्नौ द्वौ अभवताम् ॥ ८ ॥

ततो गर्भः समभवत्पृथायाः पृथिवीपते ।
शुक्ले दशोत्तरे पक्षे तारापतिरिवाम्बरे ॥ १ ॥
सा बांधवभयाद् बाला गर्भं तं विनिगूहति ।
धारयामास सुश्रोणी न चैनां बुबुधे जनः ॥ २ ॥
न हि तां वेद नार्यन्या कश्चिद्धात्रेयिकामृते ।
कन्यापुरगतां बालां निपुणां परिरक्षणे ॥ ३ ॥
ततः कालेन सा गर्भं सुषुवे वरवर्णिनी ।
कन्यैव तस्य देवस्य प्रसादादमरप्रभम् ॥ ४ ॥

(महाभारत वन. अ. ३०८)

हे पृथिवीपते ! ततः पृथायाः कुन्त्या गर्भः समभवत् । अम्बरे आकाशे दशोत्तरे शुक्ले पक्षे तारापतिः चंद्रः इव ॥ १ ॥ सा बाला सुश्रोणी कन्या कुन्ती बांधवभयात् विनिगूहति गूढं गुप्तं यथा भवति तथा कृत्वा रक्षन्ती तं गर्भं धारयामास । जनः एनां च न बुबुधे न ज्ञातवान् ॥ २ ॥ कन्यापुरगतां परिरक्षणे निपुणां बालां धात्रेयिकां ऋते धात्रीं विहाय काश्चित् काऽपि अन्य नारी कन्या स्त्री तां न वेद न ज्ञातवान् ॥ ३ ॥ ततः ऊर्ध्वं कालेन समयेन सा वरवर्णिनी उत्तमवर्णयुक्ता कुन्ती तस्य देवस्य प्रसादात् अमरप्रभं देवसदृशं गर्भं पुत्रं कन्या एव सती असूत जनयामास ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्ण उवाच—

भगवन्तमहं भक्तो यथा मां वेत्थ गोपते ।
तथा परमतिग्मांशो नास्त्यदेयं कथंचन ॥ १ ॥
न मे दारा न मे पुत्रा न चान्यद्दैवतं दिवि ।
तथेष्टा वै सदा भक्त्या यथा त्वं गोपते मम ॥ २ ॥
इष्टानां च महात्मानो भक्तानां च न संशयः ।
कुर्वन्ति भक्तिमिष्टां च जानिषे त्वं च भास्कर ॥ ३ ॥
इष्टो भक्तश्च मे कर्णो न चान्यद्दैवतं दिवि ।
जानीत इति वै कृत्वा भगवानाह मद्धितम् ॥ ४ ॥
भूयश्च शिरसा याचे प्रसाद्य च पुनः पुनः ।
इति ब्रवीमि तिग्मांशो त्वं तु मे क्षन्तुमर्हसि ॥ ५ ॥

(महाभारत वन. अ. ३०२)

कर्ण उवाच— हे परमतिग्मांशो अति तीक्ष्ण किरण हे गोपते पृथ्वीपते सूर्य ! यथा मां त्वं वेत्थ जानासि तथा एव अहं भगवन्तं त्वां भक्तः अस्मि । अतः कर्णचन किंचिदपि अदेयं दातुं अयोग्यं नास्ति ॥ १ ॥ हे गोपते ! हे सूर्य ! यथा त्वं मम भक्त्या सदा इष्टः असि तथा अन्यत् दिवि दैवतं न, न मे पुत्राः न च मे दाराः स्त्रियः इष्टाः सन्ति ॥ २ ॥ हे भास्कर सूर्य ! महात्मानः सज्जनाः इष्टानां च भक्तानां च इष्टां भक्तिं कुर्वन्ति इति त्वं जानीषे मम संशयः न ॥ ३ ॥ कर्णः मे इष्टः भक्तः च तस्य अन्यत् दैवतं दिवि नास्ति इति कृत्वा एव भगवान् मद्धितं मम हितं आह ॥ ४ ॥ अतः पुनः पुनः भूयः शिरसा प्रसाद्य याचे याचामि, इति एवं ब्रवीमि । हे तिग्मांशो ! त्वं मे तत् याचनं क्षन्तुं अर्हसि योग्योऽसि ॥ ५ ॥

प्रश्नाः

१ रावणः कस्य पुत्रः ?
२ रामः कस्मिन् कुले जातः ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३ रामः किं वीर्यः किं पराक्रमः आसीत् ?
४ रामस्य रावणेन सह किमर्थं वैरं जातम् ?
५ दशरथः राजा कस्य पुत्रः ?
६ तस्य के पुत्राः ? तेषां नामानि कानि ?
७ रामस्य का माता ?
८ भरतस्य च का माता ? भरतस्य भ्राता कः ?

Lesson– 5

Again we give some more roots in this lesson. Let the students attend to them.

(१) चूर्ण् = to powder

(लट्) वर्तमानकाल (परस्मैपद)

१ चूर्णयति, चूर्णयतः, चूर्णयन्ति । २ चूर्णयसि, चूर्णयथः, चूर्णयथ । ३ चूर्णयामि, चूर्णयावः चूर्णयामः ॥

(आत्मनेपद)

१ चूर्णयते, चूर्णयेते, चूर्णयन्ते । २ चूर्णयसे, चूर्णयेथे, चूर्णयध्वे । ३ चूर्णये, चूर्णयावहे, चूर्णयामहे ॥

(२) छिद्र् = to bore a hole

(लङ्) अनद्यतन भूत (परस्मैपद)

१ अच्छिद्रयत् अच्छिद्रयताम् अच्छिद्रयन् । २ अच्छिद्रयः, अच्छिद्रयतम्, अच्छिद्रयत । ३ अच्छिद्रयम्, अच्छिद्रयाव, अच्छिद्रयाम ॥

(आत्मनेपद)

१ अच्छिद्रयत, अच्छिद्रयेताम्, अच्छिद्रयन्त । २ अच्छिद्रयथाः, अच्छिद्रयेथाम्, अच्छिद्रयध्वम् । ३ अच्छिद्रये, अच्छिद्रयावहि, अच्छिद्रयामहि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(३) आ-ज्ञा = to order

(लोट्) आज्ञार्थ (परस्मैपद)

१ आज्ञापयतु, आज्ञापयताम्, आज्ञापयन्तु । २ आज्ञापयः, आज्ञापयतम् आज्ञापयत । ३ आज्ञापयानि, आज्ञापयाव, आज्ञापयाम ॥

(आत्मनेपद)

१ आज्ञापयताम्, आज्ञापयेताम्, आज्ञापयन्ताम् । २ आज्ञापयस्व, आज्ञापयेथाम्, आज्ञापयध्वम् । ३ आज्ञापयै, आज्ञापयावहै, आज्ञापयामहै ।

(४) तुल् = to weigh

(लिङ्) विधर्थ (परस्मैपद)

१ तोलयेत, तोलयेताम्, तोलयेयुः । २ तोलयेः, तोलयेतम्, तोलयेत । ३ तोलयेयम्, तोलयेव, तोलयेम ।

(आत्मनेपद)

१ तोलयेत, तोलयेयाताम्, तोलयेरन् । २ तोलयेथाः, तोलयेयाथाम्, तोलयेध्वम् । ३ तोलयेय, तोलयेवहि, तोलयेमहि ॥

(५) दुःख = to cause grief

(लिट्) अनद्यतन-परोक्षभूत । (परस्मैपद)

१ दुःखयांचकार, दुःखयांचक्रतुः, दुःखयांचक्रुः । २ दुःखयांचकर्थ, दुःखयांचक्रथुः, दुःखयांचक्र । ३ दुःखयांचकार (चकर), दुःखयांचकृव, दुःखयांचकृम ॥

(आत्मनेपद)

१ दुःखयांचक्रे, दुःखयांचक्राते, दुःखयांचक्रिरे । २ दुःखयांचकृषे, दुःखयांचक्राथे, दुःखयांचकृढ्वे । ३ दुःखयांचक्रे, दुःखयांचकृवहे, दुःखयांचकृमहे ।

(६) तिज् = to sharpen

(लृट्) भविष्यकाल (परस्मैपद)

१ तेजयिष्यति, तेजयिष्यतः, तेजयिष्यन्ति । २ तेजयिष्यसि, तेजयिष्यथः, तेजयिष्यथ । ३ तेजयिष्यामि, तेजयिष्यावः, तेजयिष्यामः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(आत्मनेपद)

१ तेजयिष्यते, तेजयिष्येते, तेजयिष्यन्ते । २ तेजयिष्यसे, तेजयिष्येथे, तेजयिष्यध्वे । ३ तेजयिष्ये, तेजयिष्यावहे, तेजयिष्यामहे ।

Let the students frame forms like this.

वाचनार्थ पाठः

१ तेजस्वी धनंजयः पुरंदरं प्रणिपत्य, देवराजसमीपतः भृत्यवत् प्रणतः तस्थौ । तं अर्जुनं महातेजाः कुन्तीपुत्रः युधिष्ठिरः दृष्ट्वा महता हर्षेण आविष्टः इदं आह ।

२ मत्तः अर्जुनेन सर्वाणि अस्त्राणि प्रयत्नेन लब्धानि । अतः एषः धनंजयः त्रिभिः लोकैः जेतुं न शक्यः ।

३ मे इष्टः भक्तः च कर्णः । दिवि मे अन्यत् दैवतं न ।

४ शिरसा पुनः पुनः प्रसाद्य याचे । हे तिग्मांशो इति ब्रवीमि । त्वं मे एतत् क्षन्तुं अर्हसि ।

दशम गण उभयपद धातु

चूर्ण्	= (to powder)	चूर्णयति–ते ।
छद्	= (to cover)	छादयति–ते ।
छन्द्	= (to cover)	छन्दयति–ते ।
छर्द्	= (to vomit)	छर्दयति–ते ।
छिद्र्	= (to bore hole)	छेदयति–ते ।
छिद्	= (to break)	छेदयति–ते ।
जुष्	= (to be satisfied)	जोषयति–ते ।
जॄ	= (to get old)	जारयति–ते ।
ज्ञप्	= (to know)	ज्ञपयति–ते ।
आ–ज्ञा	= (to order)	आज्ञापयति–ते ।
ताड्	= (to beat)	ताडयति–ते ।
तप्	= (to make penance)	तापयति–ते ।

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

तर्क्	= (to consider pros and cons)	तर्कयति-ते ।
तर्ज्	= (to blame)	तर्जयति-ते ।
तिज्	= (to sharpen)	तेजयति-ते ।
तिल्	= (to oil)	तेलयति-ते ।
तुल्	= (to weigh)	तोलयति-ते ।
तृप्	= (to be satisfied)	तर्पयति-ते ।
त्रस्	= (to be against)	त्रासयति-ते ।
दण्ड्	= (to punish)	दण्डयति-ते ।
दुःख्	= (to cause grief)	दुःखयति-ते ।

संस्कृत-वाक्यानि

१ वैद्यस्य भृत्यः वनस्पतिमूलानि चूर्णयति । कः एवं चूर्णयांचकार ? वयं न चूर्णयामहे । कौः चूर्णयतिष्येते ?

२ अहं एवं तर्कयामि । त्वं किं न तर्कयसि ? तौ द्वौ अपि पुरुषौ तर्कयिष्यतः । त्वं तर्कय । स तर्कयतु ।

३ वैद्यः धान्यं कदा तोलयिष्यति ? यदि सः न तोलयिष्यति तर्हि त्वं तोलयस्व । यदि त्वं अपि न तोलयिष्यसि तर्हि अहं तोलयिष्यामि ।

४ कथं स कीटः एतत् काष्ठं छिद्रयति ? कुत्र छिद्रयति ? यदा त्वं पश्यसि तदा स कीटः न छिद्रयति ।

५ आज्ञापय तव भृत्यं यत् स मम गृहं प्रति न आगच्छतु । त्वं किमर्थं मां एवं आज्ञापयसि । यदा स नृपः अत्र आगमिष्यति तदा एव स आज्ञापयिष्यति ।

६ सः भद्रः पुरुषः पितॄन्, देवान्, अतिथीन् च तर्पयति । यदा स तान् सर्वान् तर्पयांचकार तदा तेऽपि तृप्ताः सन्तः स्वं स्थानं गताः ।

७ काष्ठकारः काष्ठं यन्त्रेण छेदयति । यदि सः तत् छेदयिष्यति तर्हि त्वं तत्र गच्छ, पश्य वा । यदि स छेत्तुं इच्छति वा न ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

८ वीरः पुरुषः खड्गं तेजयति । नापितः क्षुरं तेजयति । ज्ञानी पुरुषः वाचं तेजयति ।

९ यदि त्वं जोषयसि, तर्हि सः तत्र गच्छतु । त्वं किमर्थं तं जोषयितुं इच्छसि ?

Let the students construct such sentences and increase their practice. Now learn the following roots—

10th Conjugation Root–both (परस्मै–आत्मने)

दुल् = (to swing) दोलयति–ते ।

धू = (to shake) धूनयति–ते, धावयति–ते । दुधाव, धूनयाञ्चकार–चक्रे । धुनयिता, धविता, । धूनयिष्यति–ते । धविष्यति–ते ।

धृ = (to wear) धारयति–ते ।

धृष् = (to dishonour) धर्षयति–ते ।

ध्वन् = (to make noise) ध्वनयति–ते ।

नट् = (to say) नाटयति–ते ।

नद् = (to make noise) नादयति–ते ।

निवास् = (to live) निवासयति–ते ।

प्रक्ष् = (to accept) प्रक्षयति–ते ।

पञ्च् = (to judge) पञ्चयति–ते ।

पट् = (to say) पटयति–ते ।

पत् = (to fall) पतयति–ते ।

पार् = (to complete) पारयति–ते ।

पिण्ड् = (to collect) पिण्डयति–ते ।

पीड् = (to cause grief) पीडयति–ते ।

पुष् = (to make strong) पोषयति–ते ।

पुज् = (to worship) पूजयति–ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पुर् = (to fill) पूरयति-ते ।
पूर्ण् = (to complete) पूर्णयति-ते ।
पाल् = (to protect) पालयति-ते ।

संस्कृत–वाक्यानि

१ राजा राष्ट्रं धारयति । मनुष्यः प्राणं धारयति । देहि देहं धारयति । वृक्षाः पुष्पाणि धारयन्ति ।

२ विज्ञानी पुरुषः शास्त्रसिद्धान्तं प्रपञ्चयति । कः एवं प्रपञ्चयितुं शक्नोति ? त्वं किं न प्रपञ्चयसे ?

३ स चोरः नदीं पारयते । तौ पुरुषौ नदीं पारयितुं न शक्नुतः । पाठशालायाः सर्वेऽपि बालकाः नदीं पारयिष्यन्ति नात्र संशयः ।

४ जलेन तत् पात्रं पूरय । अहं इदानीं तत्पात्रं जलेन नैव पूरयामि । श्वः वा परश्वः वा पूरयिष्यामि । कः तत् पात्रं अपूरयत् ।

५ यथा त्वं तं पुरुषं पीडयसि, तथा स त्वां नैव पीडयति । त्वं किमर्थं तं एवं पीडयसि ? स कं पीडयांचकार ।

६ ते पुरुषाः ताः स्त्रियः धर्षयांचक्रिरे । कः एवं स्त्रीं धर्षयेत् ? किमर्थं त्वं तां अधर्षयः ? यः एवं स्त्रीं धर्षयति स राजपुरुषैः दण्डयते ।

७ वायुः वृक्षं कथं दोलयति, यद्यथा । त्वं तं किमर्थं आंदोलयसि ? यदि त्वं वृक्षं एवं दोलयसि तर्हि वृक्षात् सर्वाणि फलानि पतिष्यन्ति ।

८ त्वं एवं किमर्थं पिष्टं पिण्डयसि ? अपूप-निर्माणाय अहं एवं पिष्टं पिण्डयामि । कः अपूपान् करिष्यति ?

Note

Let the students construct sentences this way and let them prepare themselves to converse, By such practice they can very soon speak in Sanskrit.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 6

(महाभारत वन० अ० ६५)

बृहदश्व उवाच—

सा तच्छ्रुत्वाऽनवद्यांगी सार्थवाहवचस्तदा ।
जगाम सह तेनैव सार्थेन पतिलालसा ॥ १ ॥
अथ काले बहुतिथे वने महति दारुणे ।
तडागं सर्वतो भद्रं पद्मसौगन्धिकं महत् ॥ २ ॥
ददर्शुर्वणिजो रम्यं प्रभूतयवसेन्धनम् ।
बहुतृणफलोपेतं नानापक्षिनिषेवितम् ॥ ३ ॥
निर्मलस्वादुसलिलं मनोहारि सुशीतलम् ।
सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः ॥ ४ ॥
संमते सार्थवाहस्य विविशुर्वनमुत्तमम् ।
उवास सार्थः सुमहान्वेलामासाद्य पश्चिमाम् ॥ ५ ॥

बृहदश्व उवाच— सा अनवद्यांगी सुन्दरशरीरावयवा दमयन्ती तदा तत् सार्थवाहवचः श्रुत्वा तस्य वणिजः भाषणं श्रुत्वा सा पतिलालसा दमयन्ती तेन एव सार्थेन वणिजां समूहेन सह जगाम अग्रे गतवती ॥ १ ॥ अथ अनंतरं बहुतिथे बहुदिने काले समये व्यतीते बहुकालानंतरं, महति दारुणे वने सर्वतोभद्रं सर्वतः कल्याणं पद्मासौगन्धिकं पद्मानां कमलानां सुगंधिना युक्तं महत् तडागं कासारम् ॥ २ ॥ रम्यं, प्रभूतयवसेन्धनं बहुतृणकाष्ठयुक्तं नानापक्षिनिषेवितं अनेकैः पक्षिभिः सेवितं वणिजः ददृशुः ॥ ३ ॥ निर्मलस्वादुसलिलं निर्मलमधुरजलयुक्तं मनोहारि मनोहरं सुशीतलं अतिशीतलं तडागं दृष्ट्वा ते सुपरिश्रान्तवाहाः अतिपरिश्रान्तवाहनाः तत्र एव निवेशाय मनः दधुः ॥ ४ ॥ सार्थवाहस्य मुख्यस्य वणिजः संमते संमत्या उत्तमं वनं विविशुः प्रविष्टाः । तत्र पश्चिमां वेलां आसद्य स सुमहान् सार्थः उवास तत्रैव निवासं चकार ॥ ५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथार्धरात्रसमये निःशब्दस्तिमिते तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ॥ ६ ॥
पानीयार्थं गिरिनदीं मदप्रस्रवणाविलाम् ।
अथापश्यत सार्थं तं सार्थजान्सुबहून्गजान् ॥ ७ ॥
ते तान्ग्राम्यगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥ ८ ॥
तेषामापततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृंगाणां पततां क्षितौ ॥ ९ ॥
स्यन्दतामपि नागानां मार्गा नष्टा वनोद्भवाः ।
मार्गे संरुध्य संसुप्तं पद्मिन्याः सार्थमुत्तमम् ॥ १० ॥
ते तं ममर्दुः सहसा चेष्टमानं महीतले ।
हाहाकारं प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः ॥ ११ ॥

अथ निःशब्दस्तिमिते शब्दरहिते स्तब्धे शांते वा अर्धरात्रसमये मध्यरात्रसमये तदा परिश्रान्ते सार्थे सुप्ते सति तत्र हस्तियूथं हस्तिनां गजानां यूथं आगमत् आगमत् ॥ ६ ॥ मदप्रस्रवणाविलां मदलावकलुषितां गिरिनदीं पानीयार्थं जलपानार्थं तत् हस्तियूथं आगमत् । अथ तत् गजयूथं सार्थजान् सार्थगतान् सुबहून् गजान् तं सार्थं च तत्र अपश्यत ॥ ७ ॥ तदा ते सर्वे मदोत्कटाः वनगजाः तान् ग्राम्यगजान् दृष्ट्वा तान् जिघांसन्तः हिंसितुमिच्छन्तः वेगेन समाद्रवन्तः तेषां उपरि अभ्यधावन्त ॥ ८ ॥ तेषां आपततां आक्रमणकारिणां गजानां वेगः दुःसहः सहनाय अशक्यः अभवत् । नगाग्रात् पर्वताग्रात् शीर्णानां विन्नानां अतएव क्षितौ भूम्यां पततां शृंगाणां वेगः यथा दुःसहः भवति तथा स तेषां वेगः दुःसहः अभवत् ॥ ९ ॥ नागानां हस्तिनां स्यन्दतां द्रवतां वनोद्भवाः वने उद्भूताः मार्गाः नष्टाः नाशं प्राप्ताः । पद्मिन्याः कमलिन्याः सकाशे मार्गं संरुध्य उत्तमं सार्थं संसुप्तं आसीत् ॥ १० ॥ ते सर्वे वनगजाः तं महीतले चेष्टमानं पतमानं सार्थं ममर्दुः । शरणार्थिनः सार्थिकाः वणिजः हाहाकारं प्रमुञ्चन्तः कुर्वन्तः ॥ ११ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वनगुल्मांश्च धावन्तो निद्रान्धा बहवोऽभवन् ।
केचिद्गन्तैः करैः केचित्केचित्पद्भ्यां हता गजैः ॥ १२ ॥
निहतोष्ट्राश्वबहुलाः पदातिजनसंकुलाः ।
भयादाधावमानाश्च परस्परहतास्तदा ॥ १३ ॥
घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले ।
वृक्षेष्वारुह्य संरब्धा पतिता विषमेषु च ॥ १४ ॥
एवं प्रकारैर्बहुभिर्दैवेनाक्रम्य हस्तिभिः ।
राजन्विनिहतं सर्वं समृद्धं सार्थमण्डलम् ॥ १५ ॥
आरावः सुमहांश्चासीत्त्रैलोक्यभयकारकः ।
एषोऽग्निरुत्थितः कष्टमायध्वं धावताधुना ॥ १६ ॥
रत्नराशिर्विशीर्णोऽयं गृह्यतां किं प्रधावत ।
सामान्यमेतद् द्रविणं न मिथ्या वचनं मम ॥ १७ ॥

बहवः मनुष्याः वनगुल्मान् वनस्थितान् वृक्षस्तंबान् धावन्तः निद्रान्धा अभवन् । केचित् मनुष्या दन्तैः करैः शुण्डाभिः केचित् पद्भ्यां गजैः हताः ॥ १२ ॥ निहतोष्ट्राश्वबहुलाः बहुलाः उष्ट्राः अश्वाः च निहताः, पदातिजनसंकुलाः पदातिजनाः संकुलिताः, भयात् आधावमानाः च तदा परस्परहताः परस्पराघातेनैव हताः ॥ १३ ॥ ते मनुष्याः घोरान् नादान् विमुञ्चन्त धरणीतले निपेतुः । वृक्षेषु आरुह्य संरब्धाः संभ्रान्ताः विषमेषु विषमस्थानेषु पतिताः ॥ १४ ॥ एवं बहुभिः प्रकारैः हस्तिभिः दैवेन दैवप्रेरणेन आक्रम्य, हे राजन् ! सर्वं समृद्धं धनयुक्तं सार्थमंडलं विनिहतं विशेषेण नाशितम् ॥ १५ ॥ तदा तत्र त्रैलोक्यभयकारकः सुमहान् आरावः कोलाहल शब्द आसीत् । एष कष्टः कष्टप्रदः अग्निः उत्थितः उत्पन्नः, आयध्वं, रक्षध्वं, अधुना धावत ॥ १६ ॥ अयं रत्नराशिः रत्नानां राशिः विशीर्णः पतितः तं गृह्णीध्वं, किं प्रधावत ? एतत् द्रविणं सामान्यं साधारणं उभयोः सत्यं वर्तते, अस्मिन् विषये मम वचनं मिथ्या न ॥ १७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एवमेवाभिभाषन्तो विद्रवन्ति भयात्तदा ।
पुनरेवाभिधास्यामि चिन्तयध्वं सकातराः ॥ १८ ॥
तस्मिंस्तथा वर्तमाने दारुणे जनसंक्षये ।
दमयन्ती च बुबुधे भयसंत्रस्तमानसा ॥ १९ ॥
अपश्यद्वैशसं तत्र सर्वलोकभयंकरम् ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा ॥ २० ॥

तदा एवं एव अभिभाषन्तः भयात् विद्रवन्ति । हे सकातराः सभयाः जनाः ! पुनः एव अभिधास्यामि कथयिष्यामि, चिन्तयध्वं विचारयध्वम् ॥ १८ ॥ तस्मिन् दारुणे भयंकरे जनसंक्षये जनानां नाशे तथा वर्तमाने सति भयसंत्रस्तमानसा भयेन त्रस्तमानसा दमयन्ती बुबुधे जागर्ति प्राप्ता ॥ १९ ॥ तत्र सर्वलोकभयंकरं सर्वलोकभयावहं वैशसं क्लेशं अपश्यत् पद्मनिभेक्षणा कमलसदृशलोचना बाला दमयन्ती तत् अदृष्टपूर्वं दृष्ट्वा भयभीता ॥ २० ॥

Lesson– 7

१ (लट्) वर्तमानकाल (परस्मैपद) = भक्षयति, भक्षयतः, भक्षयन्ति । २ भक्षयसि, भक्षयथः, भक्षयथ । ३ भक्षयामि, भक्षयावः, भक्षयामः ॥

(आत्मनेपद) = १ भक्षयते, भक्षयेते, भक्षयन्ते । २ भक्षयसे, भक्षयेथे, भक्षयध्वे । ३ भक्षये, भक्षयावहे, भक्षयामहे ॥

२ (लिट्) अनद्यतन परोक्ष–भूतकाल (परस्मैपद) = १ भक्षयांचकार, भक्षयांचक्रतुः, भक्षयांचक्रुः । २ भक्षयांचकर्थ, भक्षयांचक्रथुः, भक्षयांचक्र । ३ भक्षयांचकार–चकर, भक्षयांचकृव, भक्षयांचकृम ।

(आत्मनेपद) = १ भक्षयांचक्रे, भक्षयांचक्राते, भक्षयांचक्रिरे । २ भक्षयांचकृषे, भक्षयांचक्राथे, भक्षयांचकृढ्वे । ३ भक्षयांचक्रे, भक्षयांचकृवहे, भक्षयांचकृमहे ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Note– There after ' भक्षयां ' by adding आस, बभूव also these forms can be framed. This is already shown.

(लिट्) अनद्यतन–भविष्यकाल (परस्मैपद्) = १ भक्षयिता, भक्षयितारौ, भक्षयितारः । २ भक्षयितासि, भक्षयितास्थः भक्षयितास्थ । ३ भक्षयिताहिम, भक्षयितास्वः, भक्षयितास्मः ॥

(आत्मनेपद्) = १ भक्षयिता, भक्षयितारौ, भक्षयितारः । २ भक्षयितासे, भक्षयितासाथे, भक्षयिताध्वे । ३ भक्षयिताहे, भक्षयितास्वहे, भक्षयितास्महे ॥

४ (लृट्) भविष्यकाल (परस्मैपद्) = १ भक्षयिष्यति, भक्षयिष्यतः, भक्षयिष्यन्ति । २ भक्षयिष्यसि, भक्षयिष्यथः, भक्षयिष्यथ । ३ भक्षयिष्यामि, भक्षयिष्यावः, भक्षयिष्यामः ।

(आत्मनेपद्) = १ भक्षयिष्यते, भक्षयिष्येते, भक्षयिष्यन्ते । २ भक्षयिष्यसे, भक्षयिष्येथे, भक्षयिष्यध्वे । ३ भक्षयिष्ये, भक्षयिष्यावहे, भक्षयिष्यामहे ॥

५ (लट्) only in the vedas this is used.

६ (लोट्) आशीर्वाद (परस्मैपद्) = १ भक्षयतु–भक्षयतात, भक्षयताम्, भक्षन्तु । २ भक्षय–भक्षयतात, भक्षयतम्, भक्षयत । ३ भक्षयानि, भक्षयाव, भक्षयाम ॥

(आत्मनेपद्) = १ भक्षयताम्, भक्षयेताम्, भक्षयन्ताम् । २ भक्षयस्व, भक्षयेथाम्, भक्षयध्वम् । ३ भक्षयै, भक्षयावहै, भक्षयामहै ॥

७ (लङ्) अनद्यतन–भूतकाल (परस्मैपद्) = १ अभक्षयत्, अभक्षयताम्, अभक्षयन् । २ अभक्षयः, अभक्षयतम्, अभक्षयत । ३ अभक्षयम्, अभक्षयाव, अभक्षयाम ॥

(आत्मनेपद्) = १ अभक्षयत, अभक्षयेताम्, अभक्षयन्त । २ अभक्षयथाः, अभक्षयेथाम्, अभक्षयध्वम् । ३ अभक्षये, अभक्षयावहि अभक्षयामहि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

८ (लिङ्) विध्यर्थ (परस्मैपद) = १ भक्षयेत्, भक्षयेताम्, भक्षयेयुः । २ भक्षयेः, भक्षयेतम्, भक्षयेत । ३ भक्षयेयम्, भक्षयेव, भक्षयेम ।

(आत्मनेपद) = १ भक्षयेत, भक्षयेयाताम्, भक्षयेरन् । २ भक्षयेथाः, भक्षयेयाथाम्, भक्षयेध्वम् । ३ भक्षयेय, भक्षयेवहि, भक्षयेमहि ।

Now see the roots of the 10 th conjugation—

दशम गण उभयपद धातु

पथ्	= (to be famous)	प्रथयति–ते । प्रथयांचकार ।
प्री	= (to be satisfied)	प्रीणयति–ते । प्रीणयांचकार ।
बध्	= (to bind)	बाधयति–ते । बाधयांचकार ।
बंध्	= (to bind)	बंधयति–ते । बंधयांचकार ।
भक्ष्	= (to eat)	भक्षयति–ते । भक्षयांचकार ।
भू	= (to consider)	भावयति–ते । भावयांचकार ।
भूष्	= (to wear ornaments)	भूषयति–ते । भूषयांचकार ।
मण्ड्	= (to decorate)	मण्डयति–ते । मण्डयांचकार ।
मन्त्र्	= (to convene)	मंत्रयति–ते । मंत्रयांचकार ।
मह्	= (to worship)	महयति–ते । महयांचकार ।
मान्	= (to honour)	मानयति–ते । मानयांचकार ।
मार्ग	= (to search)	मार्गयति–ते । मार्गयांचकार ।
मार्ज्	= (to purify)	मार्जयति–ते । मार्जयांचकार ।
मिश्र्	= (to mix)	मिश्रयति–ते । मिश्रयांचकार ।
मुच्	= (to break the bondage)	मोचयति–ते । मोचयांचकार ।
मूत्र्	= (to make water; to urinate)	मूत्रयति–ते । मूत्रयांचकार ।
मृज्	= (to purify)	मार्जयति–ते । मार्जयांचकार ।
मृष्	= (to bear; the bondage)	मर्षयति–ते । मर्षयांचकार ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यंत्र्	= (to bind)	यंत्रयति–ते । यंत्रयांचकार ।
यम्	= (to bind)	यमयति–ते । यमयांचकार ।
युज्	= (to unite,to arrange)	योजयति–ते । योजयांचकार ।
रच्	= (to construct)	रचयति–ते । रचयांचकार ।
रस्	= (to absorb)	रसयति–ते । रसयांचकार ।

संस्कृत–वाक्यानि

१ विश्वामित्रः ग्रन्थं रचयति । कः एतत् अरचयत् ? यः एवं अरचयत् स इदानीं कुत्र गतः ?

२ भृत्यः प्रभातसमये मम स्थानं मार्जयति । ते सर्वे दासाः तत्र न मार्जयांचक्रुः । त्वं च मार्जयिष्यसि किम् ?

३ यथा अश्वः मूत्रयति तथा श्वा न मूत्रयति । हस्ती प्रभूतं मूत्रयति । परन्तु मत्स्याः न मूत्रयन्ति ।

४ मनुष्यः स्वदेहं अलंकारैः भूषयति । ज्ञानी पुरुषः एवं न भूषयति, तस्य विद्या एवं अलंकारः भवति ।

५ इदानीं कः अन्नं भक्षयति ? यः भक्षयितुं न इच्छति स इतः स्थानात् दूरं गच्छतु ।

६ रामः प्रजां प्रीणयांचकार । युधिष्ठिरः अपि सर्वाणि मित्राणि अप्रीणयत् । किं त्वं तथा प्रीणयिष्यसि ?

७ सर्वाणि अपि भैषज्यानि तस्मिन् पात्रे मिश्रय । त्वं तत् सर्वं मिश्रयितुं समर्थः असि वा न ? कदा ते वैद्याः भैषज्यानि मिश्रयांचक्रुः ?

८ राजा प्रीत्या सर्वान् दासान् अद्य वा श्वो वा मोचयिष्यति । ते राजपुरुषाः तान् सर्वान् मोचयांचक्रुः ?

Let the students construct sentences this way and learn to use them.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 8

संस्कृत–वाचन–पाठः

तत्र स्थितां कौसल्यां दृष्ट्वा भरतशत्रुघ्नौ रुरुदतुः । कौसल्याऽपि भरतशत्रुघ्नौ दृष्ट्वा रुदती प्राह । हे भरत ! इदं ते निष्कण्टकं राज्यं प्राप्तम् । तव माता कैकेयी मां अपि तत्रैव प्रस्थापयितुं इच्छति यत्र कमलनेत्रो रामो गतः । त्वं वा तत्र नय यत्र रामः अस्ति । कौसल्याया एवमुक्तो भरतः कौसल्यायाश्चरणयोः पपात उवाच च । आर्ये ! त्वं रामचन्द्रे मे विपुलां प्रीतिं जानात्येव । अजानन्तं निरपराधिनं मां किं एवं गर्हसे ?

तदा भरतं कौसल्याऽब्रवीत् । ते आत्मा धर्मान्न चलितः । पुत्र ! त्वं सत्यप्रतिज्ञोऽसि । अतः सतां लोकान् अवाप्स्यसि । इत्युक्त्वा भ्रातृवत्सलं भरतं समीपं आनीय आलिंग्य च प्रभूतं रुरोद । एवं तयोर्विलपतोः शोकेन सा रात्रिर्जगाम ।

एवं शोकसन्तप्तं भरतं वसिष्ठ ऋषिः उवाच । अलं शोकेन । नरपतेः दशरथस्य उत्तमं संस्कारं कुरु । तस्य वसिष्ठस्य आज्ञया धर्मज्ञो भरतो राज्ञः प्रेतकृत्यानि सर्वाण्यपि कारयामास । 'क गतोऽसि तात मां कौसल्यां च त्यक्त्वा' इत्युक्त्वा भरतशत्रुघ्नौ विलेपतुः ।

वसिष्ठस्तु तावत्याप्राह । 'युवयोः पितुः प्रेतस्य अयोद्योऽयं विधिः । अतः शोकं त्यक्त्वा स्वानि कार्याणि कर्तुं उत्तिष्ठतम् ।' इति ।

अथ चतुर्दशे दिवसे राजकर्मचारिणः समेत्य भरतमब्रुवन्– 'त्वं अद्य अस्माकं राजा भव' इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तच्छ्रुत्वा भरत उवाच- 'हे जनाः ! एतत् आभिषेचनिकं गृहीत्वा रामहेतोः अहं वनं गमिष्यामि। राम एव नः राजा भवतु' इति।

रामदर्शनेच्छया शीघ्रमेव भरतः प्रययौ। तस्याग्रतो मन्त्रिणः प्रययुः। अकैकेयश्च सर्वा अपि मातरः तान् एव अनुजग्मुः। यदा ते सर्वे शृंगवेरपुरं गंगातीरं च प्राप्ताः तदा तत्र गुहः आगत्य अब्रवीत्। 'भरत! धन्योऽसि त्वं यत् अयत्नादागतं राज्यं अपि त्यक्तुं इच्छसि रामहेतोः।' इति। तदा भरतेन परिपृष्टो गुहोऽकथयत्- 'एतद्विगुदीमूलं तृणं च, यत्र रामलक्ष्मणौ शयितौ।' इति। भरत आह- 'हा हतोऽस्मि। सभार्यो रामो मम कृते ईदृशीं तृणशय्यां अधिशेते, अहमपि अद्यप्रभृति भूमौ तृणेषु एव शयिष्ये फलमूलाशनो भूत्वा जटाचीराणि च तथैव धारयामि यथा रामो धारयति।' इति।

दाशैः गंगा संतीर्य भरतो वनं प्रययौ। ततो भरद्वाजाश्रमं गत्वा नरश्रेष्ठो भरतः क्रोशादेव सर्वं जनं अवस्थाप्य वसिष्ठेनैव च केवलेन सह भरद्वाजं प्रणनाम। अनामयं च ते परस्परं पप्रच्छुः। भरद्वाजस्तु भरतमुवाच- 'राज्यं खलु प्रशास्तस्तव इहागमने किं कार्यम्? आचक्ष्व सर्वम्। नहि मे मनः शुध्यति।' तच्छ्रुत्वा भरत उवाच- 'हतोऽस्मि, यदि भगवानपि एवं मां मन्यते न मयेष्टं मातुर्वचनं, नापि तद्दत्तं आददे। अयोध्यामेव प्रतिनेतुं रामं प्रसादयितुमहमागतोऽस्मि।'

भरद्वाजस्ततो भरतमुवाच- 'युक्तमेवैतत्त्वयि राघववंशजे। अयं ते भ्राता रामश्चित्रकूटे वसति। तं श्वः गन्ताऽसि।' ससैन्यः सपरिवारस्तां रजनीं तत्र व्युष्य भ्रातृवत्सलो भरतो चित्रकूटप्रदेशं प्राप्तः।

लक्ष्मणस्तु भरतसैन्यशब्दं श्रुत्वा अब्रवीत्- 'व्यक्तं, कैकेय्याः सुतो भरतः आर्यं हन्तुं सैन्यैः सह आगच्छति। अतः वध्य एव हि

CC-O. In Public Domain. Digitized by eGangotri Book Cannot be Sold

CC-O. In Public Domain. Digitized by eGangotri

सः।' इति। तं परिसान्त्व्य राम आह—'भरतं हत्वा किं करिष्यामि, पितुः शासनान्मया, वन एव वस्तव्यम्। अहं तु मन्ये भरतः मां अयोध्यां नेतुं मां द्रष्टुं वा आगतः। अतः त्वया न निष्ठुरं न वाच्यः।' इति।

रामसंदर्शनाय उत्सुको भरतः स्वसैन्यं शैलस्य अधस्तात् एव संस्थाप्य, मातृः मे शीघ्रं आनयेति गुरुं वसिष्ठं उक्त्वा, स्वयं अग्रे भूत्वा जगाम। गिरिशिखरं गत्वा तत्र रामं जटाजिनधरं चीरवाससं दृष्ट्वा तमभ्यधावत तस्य पादयोः पपात च 'आर्य' इत्युक्त्वा पुनः किंचिदपि वक्तुं न शशाक। तं मूर्ध्नि आघ्राय, भरतं अंके आरोप्य तं सादरं पर्यपृच्छत्—'हे सत्यपराक्रम! पितुः शुश्रूषसे कच्चित्, किं निमित्तं राज्यं हित्वा इमं देशं प्रस्थितोऽसि?

भरतस्ततो राममुवाच— 'आर्य! पुत्रशोकेन पीडितः तातः स्वर्गं गतः। नरके पतिष्यति मे जननी। बालभूतस्य मे प्रसादं कर्तुमर्हसि। अद्यैव राज्ये अभिषिच्यस्व। एतदर्थं हि सर्वा मातरः प्रजाश्चानुप्रातः। प्राप्नुहि राज्यं, कुरु च अस्मान् सर्वान् सकामानिति।' सबाष्प एव भरतो रामस्य पादौ जग्राह।

तदा राम उवाच— 'मद्विधः सत्यव्रतः राज्यहेतोः पापं कथं आचरेत्, न सूक्ष्ममपि पश्यामि त्वयि दोषम्। नापि जननीमर्हसि विगर्हितुम्। समादिष्टोऽस्मि मातापितृभ्यां वनं गच्छेति कथं ततोऽन्यत्समाचरे। त्वया एव प्रातव्यं राज्यम्। दण्डकारण्ये पुनर्मया वस्तव्यम्। पित्रा दत्तं राज्यं त्वमुपभोक्तुमर्हसि। अहं तु दुर्जातः यस्य शोकेन पिता मृतः। हे पितः! कुत्र गतोऽसि। सीते! हा मृतोऽस्मि। हे लक्ष्मण! त्वमिदानीं पितृहीनोऽसि। एवं दीर्घमाक्रोशं कृत्वा रामो लक्ष्मणमुवाच। 'तातस्य जलक्रियार्थं गमिष्यामि।' इति।

Sri Vidyabharathi Book Centre, Sringeri

×

CC-O. In Public Domain. Digitized by eGangotri

Word-meaning

रुद् – to weep
रुदती – she who weeps
निष्कंटक – without any thorn (i. e. enemies)
विपुल – very much
अवाप्स्यति – you will get.
विलपन् – He who weeps
संभ्रान्त – starting
आभिषेचनिकं – (in connection with the installation ceremony
अनुजग्मुः – followed
इंगुदीमूलं – Roots of the Ingudi tree
शयितः – Slept
दाश – fish mongers
क्रोश – Two miles
अनामय – diseaselessness

रजनी – Night
व्युष्य – having remained
परिसांत्व्य – Having pacified
निष्ठुर – with cruelty
शैल – mountain
अधस्तात् – below
अग्रे भूत्वा – Infront of
चीरवाससम् – wearer of bark-cloth
मद्विधः – Like me
सूक्ष्म – even a little
विगर्हितुं – in order to blame
वास्तव्य – hiring
दुर्जातिः – evil-born
आक्रोशः – confusion

प्रश्नाः

१ तत्र स्थितां कौसल्यां दृष्ट्वा भरतशत्रुघ्नौ किं अकुरुताम् ?
२ कौसल्या भरतशत्रुघ्नौ दृष्ट्वा किं अकरोत् ?
३ कौसल्या एवं तिरस्कृतो भरतः किं कृतवान् ?
४ भरतेन कौसल्यायै किं कथितम् ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ तदा भरतं कौसल्या किं अब्रवीत् ?
६ भरतं आलिंग्य कौसल्या किं अकरोत् ?
७ शोकसंतप्तं भरतं वसिष्ठ ऋषिः किं उवाच ?
८ वसिष्ठस्य आज्ञया भरतः किं कृतवान् ?

Lesson– 9

10 th conjugation Roots of both (परस्मै. आत्मने.)

रिच् = (to divide) रेचयति–ते । रेचयांचकार ।
लक्ष् = (to attend) लक्षयति–ते । लक्षयांचकार ।
लंघ् = (to cross; to disobey) लंघयति–ते । लंघयांचकार ।
लोक् = (to shine) लोकयति–ते । लोकयांचकार ।
वच् = (to say; to read) वाचयति–ते । वाचयांचकार ।
वर् = (to wish) वरयति–ते । वरयांचकार ।
वर्ण् = (to colour, to describe) वर्णयति–ते । वर्णयांचकार ।
वर्ध् = (to develop) वर्धयति–ते । वर्धयांचकार ।
वस् = (to live) वासयति–ते । वासयांचकार ।
विडम्ब् = (to joke) विडम्बयति–ते । विडम्बयांचकार ।
वृ = (to cover) वारयति–ते । वारयांचकार ।
वृज् = (to keep at a distance) वर्जयति–ते । वर्जयांचकार ।
व्यय् = (to spend) व्ययति–ते । व्ययांचकार ।
शिष् = (to remain) शेषयति–ते । शेषयांचकार ।
श्लिष् = (to embrace) श्लेषयति–ते । श्लेषयांचकार ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सद्	= (to get)	सादयति–ते । सादयांचकार ।
सान्त्व्	= (to console)	सान्त्वयति–ते । सान्त्वयांचकार ।
साम्	= (to console)	सामयति–ते । सामयांचकार ।
सुख्	= (to be happy)	सुखयति–ते । सुखयांचकार ।
स्तन्	= (to make noise)	स्तनयति–ते । स्तनयांचकार ।
स्तेन्	= (to steal)	स्तेनयति–ते । स्तेनयांचकार ।

संस्कृत–वाक्यानि

१ स नैव लक्षयति । तौ कथं लक्षयतः ? ते सर्वेऽपि सर्वदा लक्षयन्ति । अहं लक्षयिष्ये । आवां लक्षयिष्यावहे । वयं सर्वेऽपि न लक्षयिष्यामहे ।

२ स हनुमान् इदानीं महासागरं लंघयति । कः एवं नदीं अलंघयत् । यूयं कदा सागरं लंघयिष्यथ ?

३ अहं न लोकयामि । त्वं विलोकयिष्यसि किम् ? कः तदा लोकयांचकार ? मम पुत्राः विलोकयांचक्रुः ।

४ पुत्राः इदानीं पुस्तकानि वाचयन्ति किम् ? के मनुष्याः पुस्तकानि वाचयितुं न शक्नुवन्ति ? ते वाचयांचक्रुः ते कुत्र गताः ?

५ चित्रकारः चित्रं वर्णयति । कवयः काव्येषु नायकान् वर्णयन्ति । त्वं किं अवर्णयः ? स वर्णयांचकार ।

६ धीरः पुरुषः तं सान्त्वयति । यथा तं त्वं सान्त्वयसि तथा स न सान्त्वयितुं शक्नोति । तं परिसान्त्वय इदानीम् ।

७ पुरुषः स्त्रीं सुखयति । मित्रं मित्रं सुखयति । ते पुत्रान् सुखयांचक्रुः । त्वं कं असुखयः ?

८ मेघः आकाशे स्तनयति । मेघाः आकाशे स्तनयांचक्रुः । स किमर्थं एवं स्तनयति ।

९ चोरः तत्र स्तेनयति । कः एवं अत्र अस्तेनयत् ? य स्तेनयति सः स्तेन इति कथ्यते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

१० पुरुषः स्त्रीं वरयति । स्त्री पुरुषं अवरयत् । के पुरुषाः वरयांचक्रुः ?

10 th conjugation Both परस्मै० आत्मने०

स्तोम् = (to praise) स्तोमयति–ते । स्तोमयांचकार ।
स्निह् = (to make friend with) स्नेहयति–ते । स्नेहयांचकार ।
स्पृह् = (to wish) स्पृहयति–ते । स्पृहयांचकार ।
स्फुट् = (to break) स्फोटयति–ते । स्फोटयांचकार ।
स्वद् = (to taste) स्वदयति–ते । स्वदयांचकार ।
हिंस् = (to kill) हिंसयति–ते । हिंसयांचकार ।

संस्कृत–वाक्यानि

१ ऋत्विक् देवता स्तोमयति । यजमानः स्तोमयांचकार ।
२ अहं मोदकान् स्वादयामि । कः रसं अस्वादयत् ?
३ नरः पशून् हिंसयति । सिंहः हस्तिनं हिंसयति ।

Let the students construct such sentences and develop their progress. If the students will remember so many of the 10th conjugation roots, then they will learn the Sanskrit language very soon; because by remembering the verbs well, they will have an easy entrance into Sanskrita litrature.

The above given roots belong to both the परस्मैपद and आत्मनेपद. In this 10 th conjugation there are little number of roots which belong to only परस्मैपद. The आत्मनेपद roots are small in number and we give some of them here.

10 th Conjugation Root of Atmanepad

अर्थ् = (to beg) अर्थयते । अर्थयांचक्रे । अर्थयिता । अर्थयिष्यते ।

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुत्स् = (to blame) कुत्सयते । कुत्सयांचक्रे । कुत्सयिता । कुत्सयिष्यते ।
गंध् = (to kill, to trouble) गंधयते । गंधयांचक्रे । गंधयिता ।
गर्व् = (to be proud) गर्वयते । गर्वयांचक्रे । गर्वयिता । गर्वयिष्यते ।
चिंत् = (to think) चेतयते । चेतयांचक्रे ।
तर्ज् = (to blame) तर्जयते । तर्जयांचक्रे ।
त्रुट् = (to break) त्रोटयते । त्रोटयांचक्रे ।
दंश् = (to bite) दंशयते । दंशयांचक्रे ।
दंस् = (to bite) दंसयते । दंसयांचक्रे ।
भर्त्स् = (to blame, to rebuke) भर्त्सयते । भर्त्सयांचक्रे ।
मृग् = (to search) मृगयते । मृगयांचक्रे ।
यक्ष् = (to worship) यक्षयते । यक्षयांचक्रे ।
वीर् = (to be brave) वीरयते । वीरयांचक्रे ।
संग्राम् = (to fight) संग्रामयते । संग्रामयांचक्रे ।

These have their forms in Atmanepad only and they have been shown before. So the students can frame the sentences themselves.

संस्कृत–वाक्यानि

१ भिक्षुकः धनं प्रार्थयते । त्वं किं न प्रार्थयसे ? अहं अर्थये । स तद् अर्थयांचक्रे । ते अर्थयांचक्रिरे ।
२ वीरः गर्वयते वीरपुरुषौ गर्वयिष्येते । त्वं एवं मा गर्वय । यूयं गर्वयांचक्रुध्वे ।
३ त्वं चेतयसे । सर्वे चेतयिष्यन्ते । स चेतयांचकार ।
४ सर्पः मनुष्यं दंशयते । सर्पा मनुष्यान् दंशयिष्यन्ते ।
५ राजा राजपुरुषान् अपराधिनः धनंजयं भर्त्सयेत् ।

Sri Vidyabharathi Book Centre

CC-O. In Public Domain. Digitized by eGangotri

६ राजा वने व्याघ्रं मृगयते । त्वं मृगयसे किम् ?
७ यः वीरयते स एव वीरः भवति ।
८ सर्वे पुरुषाः पानिपतनगरे संग्राममयांचक्रुः ।
९ त्वं गंधयिष्यसे चेत् तर्हि स किं करिष्यति ?
१० भ्रातरः परस्परं कुरलयांचक्रुः ।

Let the students construct sentences this way and advance their progress by using them in talking.

Lesson– 10

संस्कृत–वाचन–पाठः

एवं ब्रुवतां तेषां रामभरतादीनां रजनी व्यवर्तत । प्रभाते भरतो रामचन्द्रं सुहृन्मध्ये उपविष्टमब्रवीत् । 'मे माता कैकेयी त्वया सान्त्विता । राज्यं च मह्यं दत्तम् । तदेव राज्यं तुभ्यमहं ददामि । अकंटकं भुंक्ष्व राज्यम्' इति । रामस्तु तदा भरतं समाश्वासयत् ।

राम उवाच– 'न आत्मनः कामचारो हि पुरुषः । किंतु अनीश्वरः । सर्वेऽपि निचयाः क्षयान्ताः । संयोगा वियोगान्ताः । मरणान्तं च जीवितम् । अतस्त्वं स्वस्थो भव । अयोध्यां गच्छ, शोकं त्यज । यथा पित्रा यत्र नियुक्तोऽसि तथा कुरु । अहमपि पुण्यकर्मणा तेनैव पित्रा यत्र नियुक्तोऽस्मि तत्रैवारण्यार्यस्य शासनं करिष्यामि उभयोरपि आवयोः स पिता मान्य एव ।'

भरत उवाच– 'हे सत्यप्रतिज्ञ राम ! मयि प्रोषिते तत् अनिष्टं पापं क्षुद्रया मात्रा कृतम् । बद्धोऽस्मि धर्मबन्धेन तेन इमां मातरं पापकारिणीं न हनिम् । तातं च न परिगर्हे स अस्माकं दैवतम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

को हि धर्मज्ञ ईदृशं कुर्यात् ? स्त्रियः प्रियचिकीर्षवः अन्तकाले हि पुरुषाः मुह्यन्ति इति श्रुतम्। तत्प्रत्यक्षीकृतमत्र। श्रायताम् भवान् सर्वान्। कव च अरण्यं कव च क्षात्रं। कव जटाः कव च प्रजापालनम्। अहं हि भवतः बालः ज्ञानेन ज्यानेन जन्मना च सोऽहं भवति तिष्ठति कथं भूमिं पालयिष्यामि ? मां किल्बिषाद्रक्ष। नीचेद्भवता सार्धं अहमपि गमिष्यामि वनम्।' इति।

एतच्छ्रुत्वा लक्ष्मणाग्रजो रामः पुनः प्रत्युवाच-'हे भ्रातः! पुरा किल तव पित्रा देवासुरसंग्रामे तव जनन्यै द्वौ वरौ दत्तौ। ताभ्यां वराभ्यां सा तव माता तव राज्यं मम प्रव्राजनं अयाचत। सोऽहं पितुः सत्यवादे स्थितः भवानपि पितरं सत्यवादिनं कर्तुमर्हति। सत्ये लोकः प्रतिष्ठितः। भूमिः कीर्तिः यशो लक्ष्मीः सत्यमेव समनुवर्तन्ते। सत्यमेव ततो भजेत्। मम जीवता पिता यद्विक्रीतं, आहितं, क्रीतं वा तद्धरतेन भया वा न शक्यं लोपयितुम्। अहं पुनः वनात् भ्राता लक्ष्मणेन सह यदा प्रत्यागतो भविष्यामि, तदा पृथिव्याः पतिर्भविष्यामि।' इति।

पुनः भ्रातुः पादयोर्निपत्य भृशं प्रार्थयामास भरतः। 'अहमेकस्तु सुमहद्राज्यं नोत्सहे रक्षितुं त्वं हि शक्तः लोकस्य परिपालने।' इति।

रामः पुनरुवाच-'हे भरत! लक्ष्मीश्चन्द्रादपेयात् हिमवान् वा पर्वतः हिमं त्यजेत्, सागरो वा वेलामतीयात्, न त्वहं प्रतिज्ञां त्यजेयम्।' इति।

भरतेनापि प्रतिज्ञातम्। स च आह च-'आर्य! देहि तव पादुके एते हि सर्वराज्यस्य योगक्षेमं विधास्यतः।' इति।

तदा रामस्तथा कृत्वा पादुके भरताय प्रायच्छत्। सोऽपि पादुके संप्रणम्य उवाच-'चतुर्दश वर्षाण्यहं जटाचीरधारी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वक्ष्यामि नगराद् बहिः आगमनं तव आकांक्षन्, ते पादुकयोः उपरि राज्यतन्त्रं न्यस्यामि। संपूर्णे हि चतुर्दशे वर्षेऽहनि यदि न द्रक्ष्यामि त्वां हुताशनमेव प्रवेक्ष्यामि।' इति।

तथेति रामः प्रतिज्ञाय सादरं शत्रुघ्नं भरतं च परिष्वज्य उवाच- 'रक्ष मातरं कैकेयीम्, मा तां प्रति रोषं कुरु।' इति।

इत्युक्त्वा अश्रुपरीताक्षः रामः भ्रातरं भरतं विसंसर्ज। भरतोऽपि राघवं प्रदक्षिणं चकार। संपरिगृह्य पादुके च स अयोध्यां आजगाम।

ततो मातृः अयोध्यायां निक्षिप्य भरतोऽब्रवीत्- 'अहं नंदिग्रामे गमिष्यामि' ततो मंत्रिणामनुमते भरतो मुनिवेषधरो नंदिग्रामेऽवसत्। अभिषिच्य तत्रार्यपादुके सर्वदा तदधीनो राज्यं कारयामास।

सर्वेषु भारतादिषु अपयातेषु सलक्ष्मणो रामचंद्रस्तत्र वासं नारोचयत्। ततो मुनिभिरभ्यनुज्ञातो रामचंद्रः सभार्यः वनं प्रविवेश।

दण्डकारण्यं प्रविश्य तु रामस्तापसाश्रममंडलं ददर्श। तत्रस्थास्तापसाः स्निग्धाश्च तान् रामचंद्रादीन् यथान्यायं तर्पयामासुः। कृतातिथ्यास्तु ते मुनीनामंडय वनमेवाभ्यवगाहन्त। रामलक्ष्मणौ तत्र भैरवं पुरुषादं विराधं नाम राक्षसं ददृशतुः। अपकृष्य वैदेहीं विराधोऽब्रवीत्। अस्मिन्नेते समेयं भार्या। रुधिरं च युवयोः पास्यामि' इति। रामलक्ष्मणौ तु ततो दीप्तं शरवर्षं ववर्षतुः। सौमित्रिः सव्यं रामोऽपि तस्य दक्षिणं बाहुं बभञ्ज। रामबाणैश्च विद्धः विराधः भूमौ पपात, ममार च।

एवं विराधं राक्षसं हत्वा ते शरभंगस्याश्रमं अभिजग्मुः। शरभंगोऽपि रामस्य आतिथ्यं यथायोग्यं चकार।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Word-meanings

शोचत्	– he who grieves.	भजेत्	– let be served
रजनी	– night	विक्रीत	– sold
सुहृद्	– a friend	आहित	– kept
सान्त्वित्	– consoled	क्रीत	– bought
अकंटक	– without obstacles, without sorrow	भूयम्	– Again
		अपेयात्	– let go
समाश्वासयत्	– heartened	हिमवत्	– The Himalaya mountain
कामचारः	– acting as one's likes.	हिमम्	– Ice
क्षयान्तम्	– ending in destruction	वेला	– boundary
		अतीयात्	– let him cross
स्वस्थ	– Healthy	पादुका	– Sandals
नियुक्त	– Induced	प्रायच्छत्	– gave
शासन	– order	संप्रणम्य	– bowing down
प्रोषित	– when not in town	आकांक्षन्	– wishing
गर्ह्	– to blame (V. root)	हुताशन	– fire
		परिष्वज्ज	– embracing
प्रियचिकीर्षुः	– doing good	रोषः	– Anger
प्रत्यक्षीकृत	– personally seen	अश्रुपरिताक्षः	– eyes filled with tears
त्रायताम्	– protect	विससर्ज	– left
किल्बिष	– sin	प्रदक्षिणम्	– going round
सत्यवाद	– truth	अपयात	– went
अनुवर्तते	– follows	वासः	– livlng
		अरोचयत्	– approved, got pleased

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यनुज्ञात – having got orders
मंडलम् – group
आमंत्र्य – having called up.
भैरव – fearful
पुरुषादः – man-eater
सौमित्रिः – [Lakshmana (Son of Sumitra)]

समासाः

१ रामभरतादयः = रामश्च भरतश्च रामभरतौ। रामभरतौ आदि येषां ते रामभरतादयः।
२ सुहृन्मध्यम् = सुहृदां मध्यं।
३ अकंटकम् = न विद्यन्ते कंटकाः यस्मिन् तत्।
४ कामचारः = कामं यथा स्यात् तथा चरति।
५ अनीश्वरः = न ईश्वरः।
६ क्षयान्तः = क्षयः अन्ते यस्य।
७ मरणान्तम् = मरणं अन्ते यस्य।
८ स्वस्थः = स्वस्मिन् स्थितः।
९ पुण्यकर्मन् = पुण्यं कर्म यस्य।
१० सत्यप्रतिज्ञः = सत्या प्रतिज्ञा यस्य।
११ धर्मज्ञः = धर्मं जानाति इति।
१२ प्रजापालनम् = प्रजानां पालनम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 11

(महाभारत वनपर्व, अ. ९४)

वामदेव उवाच—

अयुद्धेनैव विजयं वर्धयेद्वसुधाधिपः
जघन्यमाहुर्विजयं युद्धेन च नराधिपः ॥ १ ॥
न चाप्यलब्धं लिप्सेत मूले नातिदृढे सति ।
नहि दुर्बलमूलस्य राज्ञो लाभो विधीयते ॥ २ ॥
यस्य स्फीतो जनपदः संपन्नप्रियराजकः ।
संतुष्टपुष्टसचिवो दृढमूलः स पार्थिवः ॥ ३ ॥
यस्य योधाः सुसंतुष्टाः सान्त्विताः सुपधास्थिताः ।
अल्पेनापि स दण्डेन महीं जयति पार्थिवः ॥ ४ ॥

वामदेव उवाच— वसुधाधिपः पृथिवीपतिः अयुद्धेनैव युद्धेन विना एव विजयं वर्धयेत् जयं सम्पादयेत् । हे नराधिप, राजन्, युद्धेन विजयं युद्धद्वारा प्राप्तं विजयं जघन्यं निकृष्टं आहुः कथयन्ति ॥ १ ॥ तथा मूले अतिदृढे न सति, निर्बले राज्यशासने सति, अलब्धं अप्राप्यं न लिप्सेत् न इच्छेत् । हि यस्मात्कारणात् दुर्बलमूलस्य अशक्तमूलस्य राज्ञः नरपतेः लाभः च विधीयते न भवति ॥ २ ॥ यस्य नराधिपस्य जनपदः प्रजासमूहः स्फीतः संवृद्धि गतः, संपन्नप्रियराजकः संपन्नाश्च प्रियाश्च राज्यशासकाः यस्य सः, सन्तुष्टपुष्टसचिवः सन्तुष्टाश्च पुष्टाश्च मन्त्रिणः यस्य सः, पार्थिवः राजा 'दृढमूलः' भवति ॥ ३ ॥ यस्य राज्ञः योधाः सैनिकाः सुसंतुष्टाः सम्यग् तुष्टाः सान्त्विताः सुखिताः सुपधास्थिताः सम्यग् परीक्षिताः भवन्ति स पार्थिवः धराधिपः अल्पेनापि लघुनापि दण्डेन महीं पृथिवीं जयति ॥ ४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पौरजानपदा यस्य भूतेषु च दयालवः ।
सधना धान्यवन्तश्च दृढमूलः स पार्थिवः ॥ ५ ॥

प्रतापकालमधिकं यदा मन्येत चात्मनः ।
तदा लिप्सेत मेधावी परभूमिं धनान्युत ॥ ६ ॥

भोगेषूदयमानस्य भूतेषु च दयावतः ।
वर्धते त्वरमाणस्य विषयो रक्षितात्मनः ॥ ७ ॥

तक्षेदात्मानमेवं स वनं परशुना यथा ।
यः सम्यग् वर्तमानेषु स्वेषु मिथ्या प्रवर्तते ॥ ८ ॥

नैव द्विषन्तो हीयन्ते राज्ञो नित्यमनिघ्नतः ।
क्रोधं निहन्तुं यो वेद तस्य द्वेष्टा न विद्यते ॥ ९ ॥

यस्य पार्थिवस्य पौरजानपदाः पुरवासिनः प्रजाश्च भूतेषु प्राणिमात्रेषु दयालवः दयावन्त, सधना धनेन सहिताः धान्यवन्तश्च धान्य वताश्च भवन्ति सः पार्थिवः 'दृढमूलः' मन्तव्यः ॥ ५ ॥ यदा राजा आत्मनः स्वस्य अधिकं विशेषं प्रतापकालं प्रभावसमयं मन्येत अवबुध्येत, तदा मेधावी बुद्धिमान् (स राजा) परभूमिं परेषां भूमिं, उत तथा धनानि द्रव्याणि लिप्सेत इच्छेत् ॥ ६ ॥ भोगेषु उदयमानस्य वर्धमानस्य, च तथा भूतेषु प्राणिषु दयावतः करुणाशीलस्य, त्वरमाणस्य कर्म शीघ्रं सम्पादयतः, रक्षितात्मनः आत्मरक्षायां समर्थस्य राज्ञ एव विषयः राष्ट्रं वर्धते वृद्धिं प्राप्नोति ॥ ७ ॥ यः सम्यक् वर्तमानेषु विद्यमानेषु स्वेषु आत्मीयजनेषु मिथ्या प्रवर्तते आचरते स आत्मनं एवं तक्षेत् यथा वनं अरण्यं परशुना तक्षेत् ॥ ८ ॥ नित्यं सर्वदा अनिघ्नतः राज्ञः अहिंसकस्य पृथिवीपतेः द्विषन्तः शत्रवः नैव हीयन्ते न न्यूनाः भवन्ति; यः क्रोधं निहन्तुं नियन्तुं वेद जानाति तस्य द्वेष्टा द्वेषकर्ता न विद्यते नैव भवति ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यदार्यजनविद्विष्टं कर्म तन्नाचरेत् बुधः ।
यत्कल्याणमभिध्यायेत्तत्तत्रात्मानं नियोजयेत् ॥ १० ॥
नैवमन्येऽवजानन्ति नात्मना परितप्यते ।
कृत्यशेषेण यो राजा सुखान्यनुबुभूषति ॥ ११ ॥
इदं वृत्तं मनुष्येषु वर्तते यो महीपतिः ।
उभौ लोकौ विनिर्जित्य विजये सम्प्रतिष्ठते ॥ १२ ॥

भीष्म उवाच—

इत्युक्तो वामदेवेन सर्वं तत्कृतवान्नृपः ।
तथा कुर्वंस्त्वमप्येतौ लोकौ जेता न संशयः ॥ १३ ॥

यत् कर्म कार्यं आर्यजनविद्विष्टं श्रेष्ठपुरुषैः निंदितं अस्ति तत् कर्म बुधः बुद्धिमान् राजा न आचरेत् न कुर्यात्। यत्कल्याणं अभिध्यायेत् येन कर्मणा मङ्गलं स्यात् तत्र आत्मानं नियोजयेत् ॥ १० ॥ यो राजा नरपतिः कृत्यशेषेण कर्तव्यपालनेन सुखानि अनुबुभूषति अनुभवितुं इच्छति तं राजानं अन्ये नैव अवजानन्ति तस्य अवज्ञां नैव कुर्वन्ति ॥ ११ ॥ यः महीपतिः यः राजा मनुष्येषु प्रजासु इदं वृत्तं व्यवहारं वर्तते आचरते स राजा उभौ लोकौ मर्त्यलोकं स्वर्गं च विनिर्जित्य विजये सम्प्रतिष्ठते सर्वेषां साफल्यं प्राप्नोति ॥ १२ ॥

भीष्म उवाच— ऋषिना वामदेवेन इत्युक्तः इत्थं उपदिष्टः नृपः वसुमना नाम नृपतिः तत्सर्वं कृतवान्। त्वमपि (हे युधिष्ठिर) तथा तद्वत् कुर्वन् एतौ उभौ जेता भविष्यसि, न संशयः अस्मिन् विषये संशयो नास्ति ॥ १३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

By

Padmabhushan Pt. Shripad Damodar Satwalekar

(English Edition)

1– The easiest way to the study of Sanskrit is shown in this Series.

2– One, who devotes half an hour daily to these books, can learn within a period of six months that much of Sanskrit, so as to follow Mahabharat and Ramayana easily.

3– Hundreds of students have been so far benefited by this series.

4– The Series comprises 18 parts.

Price– Full Set 18 Parts Rs. 36.00
(Rs. 2.00 for each part).

Hurry up. Make haste to place your order for the books with—

The manager
Swadhyaya Mandal
Killa-Pardi
Dist. Valsad (Gujarat)

Sri Vidyabharathi Book Centre, Sringeri

Printer and Publisher : V. S. Satwalekar,
Bharat Mudranalaya, PARDI. (Valsad)